# यामुनमुनिप्रणीतगीतार्थसारसंग्रहः

१. स्वधर्मज्ञानवैराग्य - साध्यभक्त्येकगोचरः।
नारायणः परं ब्रह्म गीताशास्त्रे समीरितः।। संपूर्णगीतासारः।।

२. ज्ञानकर्मात्मिके निष्ठा योगलक्ष्ये सुसंस्कृते।
आत्मानुभूतिसिद्ध्यर्थे पूर्वषट्केन चोदिते।। अ० ०१ - ०६।।

३. मध्यमे भगवत्तत्त्व- याथात्म्यावाप्तिसिद्धये।
ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः।। अ० ०७ - १२।।

४. प्रधानपुरुषव्यक्त - सर्वेश्वरविवेचनम्।
कर्मधीर्भक्तिरित्यादिः पूर्वशेषोऽन्तिमोदितः।। अ० १३ - १८।।

५. अस्थानस्नेहकारुण्यधर्माधर्मधियाकुलम्।
पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम्।।

६. नित्यात्मासङ्गकर्मेहागोचरा साङ्ख्ययोगधीः।
द्वितीये स्थितधीलक्षा प्रोक्ता तन्मोहशान्तये।।

७. असक्त्या लोकरक्षायै गुणेष्वारोप्यकर्तृताम्।
सर्वेश्वरे वा न्यस्योक्ता तृतीये कर्मकार्यता।।

८. प्रसङ्गात्स्वस्वभावोक्तिः कर्मणोऽकर्मताऽस्य च।
भेदा ज्ञानस्य माहात्म्यं चतुर्थाध्याय उच्यते।।

९. कर्मयोगस्य सौकर्यं शैघ्र्यं काश्चन तद्विधाः।
ब्रह्मज्ञानप्रकारश्च पंचमाध्याय उच्यते।।

१०. योगाभ्यासविधिर्योगी चतुर्धा योगसाधनम्।
योगसिद्धिः स्वयोगस्य पारम्यं षष्ठ उच्यते।।

११. स्वयाथात्म्यं प्रकृत्यास्य तिरोधीः शरणागतिः।
भक्तभेदः प्रबुद्धस्य श्रैष्ठ्यं सप्तम उच्यते।।

१२. ऐश्वर्याक्षरयाथात्म्यभगवच्छरणार्थिनाम्।
वेद्योपादेयभावानामष्टमे भेद उच्यते।।

१३. स्वमाहात्म्यं मनुष्यत्वे परत्वं च महात्मनाम्।
विशेषो नवमे योगो भक्तिरूपः प्रकीर्तितः।।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

१४. स्वकल्याणगुणानन्त्यकृत्स्नस्वाधीनतामतिः।
भक्त्युत्पत्तिविवृद्ध्यर्था विस्तीर्णा दशमोदिता।।

१५ एकादशे स्वमाहात्म्यसाक्षात्कारावलोकनम्।
दत्तमुक्तं विदिप्राप्त्योर्भक्त्येकोपायता तथा।।

१६ भाक्तैः श्रैष्ठ्यमुपायोक्तिरशक्तस्यात्मनिष्ठता।
तत्प्रकारास्त्वतिप्रीतिर्भक्ते द्वादश उच्यते।।

१७ देहस्वरूपमात्माप्तिहेतुरात्मविशोधनम्।
बन्धहेतुर्विवेकश्च त्रयोदश उदीर्यते।।

१८ गुणबन्धविधा तेषां कर्तृत्वं तन्निवर्तनम्।
गतित्रयस्वमूलत्वं चतुर्दश उदीर्यते।।

१९ अचिन्मिश्राद्विशुद्धाच्च चेतनात्पुरुषोत्तमः।
व्यापनाद्भरणात्स्वाम्यादन्यः पंचदशोदितः।।

२० देवासुरविभागोक्तिपूर्विका शास्त्रवश्यता।
तत्त्वानुष्ठानविज्ञानस्थेम्ने षोडश उच्यते।।

२१ अशास्त्रमासुरं कृत्स्नं शास्त्रीयं गुणता पृथक्।
लक्षणं शास्त्रसिद्धस्य त्रिधा सप्तदशोदितम्।।

२२ ईश्वरे कर्तृताबुद्धिः सत्त्वोपादेयताऽन्तिमे।
स्वकर्मपरिणामश्च शास्त्रसारार्थ उच्यते।।

कृष्ण और अर्जुन के नाम किस अध्याय में कितने बार -:

| अध्याय | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ |
|---|---|---|---|---|---|---|---|---|---|
| कृष्ण | १० | ४ | ३ | - | १ | ४ | - | २ | - |
| पार्थ | १ | २१ | ११ | १० | २ | ८ | १० | ८ | ८ |

| अध्याय | १० | ११ | १२ | १३ | १४ | १५ | १६ | १७ | १८ |
|---|---|---|---|---|---|---|---|---|---|
| कृष्ण | १० | ३१ | - | - | १ | - | - | १ | ४ |
| पार्थ | ९ | ९ | १ | ५ | ११ | ३ | ५ | ४ | २१ |



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM